

# Bhāravi, *Kirātārjunīya*, XVIII, 35; 37-39

(Traduzione in S. Lienhard, G. Boccali, a c. d., *Poesia indiana classica*, Marsilio, Venezia 2009, pp. 89-90).

त्वमन्तकः स्थावरजङ्गमानां त्वया जगत्प्राणिति देव विश्वम् ।

त्वं योगिनां हेतुफले रुणत्सि त्वं कारणं कारणकारणनाम् ॥ 35 ॥

तरसा भुवनानि यो बिभर्ति ध्वनति ब्रह्म यतः परं पवित्रम् ।

परितो दुरितानि यः पुनीते शिव तस्मै पवनातने नमस्ते ॥ 37 ॥

भवतः स्मरतां सदासने जयिनि ब्रह्ममये निषेदुषाम् ।

दहते भवबीजसंततिं शिखिने ऽनेकशिखाय ते नमः ॥ 38 ॥

आबाधामरणभयार्चिषा चिराय प्लुष्टेभ्यो भव महता भवानलेन ।

निर्वाणं समुपगमेन यच्छते ते बीजानां प्रभव नमो ऽस्तु जीवनाय ॥ 39 ॥

tvam antakaḥ sthāvarajaṅgamānāṃ tvayā jagat prāṇiti deva viśvam /

tvaṃ yogināṃ hetuphale ruṇatsi tvaṃ kāraṇaṃ kāraṇakāraṇānām // 35 //

tarasā bhuvanāni yo bibharti dhvanati brahma yataḥ paraṃ pavitram /

parito duritāni yaḥ punīte śiva tasmai pavanātane namas te // 37 //

bhavataḥ smaratāṃ sadāsane jayini brahmamaye niṣeduṣām /

dahate bhavabījasaṃtatiṃ śikhine 'nekaśikhāya te namaḥ // 38 //

ābādhāmaraṇabhayārciṣā cirāya pluṣṭebhyo bhava mahatā bhavānalena /

nirvāṇaṃ samupagamena yacchate te bījānāṃ prabhava namo 'stu jīvanāya // 39 //